**04**

**SET - 1**

# HIGHER SECONDARY EDUCATION

## Half Yearly Examination-2017- 18

**Second Language**

**Part II**

**SANSKRIT**

**HSE II**

**Total Score : 80**
**Time : 2 ½ Hours**
**Cool off Time : 15 Minutes**

## निर्देशाः

- सर्वे प्रश्नाः समाधेयाः।
- प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरयत।
- प्रश्नानां वाचनाय १५ निमेषाः कल्पिताः।

**I. अधोनिर्दिष्टेषु प्रश्नेषु पञ्चानामुत्तरं कोष्ठकात् निर्धार्य लिखत।** **(5x1=5)**

1. श्री जयदेवभणितं गीतं किम्?
   (गीतगोविन्दम्, क्रिस्तुभागवतम्, श्रीकृष्णविलासः)
2. व्यासरचितः इतिहासग्रन्थः कः?
   (रामायणम्, महाभारतम्, नैषधम्)
3. क्रिस्तुभागवतस्य कर्ता कः?
   (पि.सि. देवस्या, एन् गोविन्दपिल्ला, मुतुकुलं श्रीधरः)
4. "जीवितस्य वेदनामहम् अजानम्"- कस्य वचनमिदम्?
   (यशोधरायाः, श्रीबुद्धस्य, छन्दस्यः)
5. गुरोरन्तर्गतं न्यायाधिपाय न्यवेदयत्- अत्र गुरुः कः?
   (कुमारनाशान्, नारायणगुरुः, माडनाशान्)
6. केरलीय संस्कृतरूपकाभिनयं किम्?
   (कूटियाट्टम्, यक्षगानम्, अष्टपदी)
7. सूर्याय सङ्कल्पितं अलोकसामान्यं मन्दिरं कुत्र वर्तते?
   (अजन्ता, काशी, कोणार्क्)

**II. अधोनिर्दिष्टयोः प्रश्नयोः एकस्य उत्तरं निर्देशानुसारं लिखत।** **(1x6=6)**

**क. इष्टतमं श्लोकं चित्वा आस्वादनटीकां रचयत।**

1. मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः।
   कुमारश्चिन्तयामास भाविशिष्यगणं निजम्।।
2. मुनिना तेननीतोऽसौ त्राबोरद्रेरधित्यकाम्।
   अशेत स्थण्डिले पश्यन् रम्याः प्रकृतिसम्पदः।।
3. पुरे नासरथे सार्धं कन्यया प्रियया चरन्।
   असिधारा व्रतं तक्षा शिशुं दिव्यमपूपुषत्।।

ख. **'व्रज हरितम्' इति पाठभागम् अधिकृत्य शारिकायाः कथां सूचनानुसारं लिखत।**

**सूचना-**

- ✯ भवन्तः गच्छन्तु नाहमधुना आगच्छामि।
- ✯ पितरौ भोजनमन्विष्य गतौ।
- ✯ वृक्षाः पोतकानिव संरक्षन्ति स्म।
- ✯ वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव।

## III. प्रदत्तं गद्यभागं पठित्वा अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत।

अनन्तपुर्याः अदूरवर्तिनः अरुविप्पुरजनपदस्य प्रान्ते सन्यासिवर्येण नारायणगुरुणा स्थापितः एकः मठः आसीत्। तस्य मठस्य समीपे एकं कदलीवनमवर्तत।

एकदा क्षुधार्तः कश्चित् कदलीफलगुञ्जम् एकं मुषित्वा अगच्छत्। तत्रस्थैः अन्तेवासिभिः परिश्रमेण गृहीतोऽयं चोरः आरक्षिजनसमक्षं नीतः। मठस्य धनम् अपहृतमिति ज्ञात्वा न्यायाधीशः एकाधिकं शतं ताडनं तस्य दण्डरूपेण अघोषयत्।

कर्णाकर्णिकया वृत्तान्तममुं विज्ञाय तद्देशवासिनः जनाः आश्रमं समागताः। तदानीम् अनन्तपुरीतः आश्रमम् आगतः श्रीनारायणगुरुदेवः इमां वार्तां निशम्य खिन्नमानसोऽभवत्।

1. श्रीनारायणगुरुणा स्थापितः मठः ——— जनपदस्य प्रान्ते आसीत्। **(1 x 1=1)**
2. क्षुधार्तः पुरुषः किं मुषित्वा अगच्छत्? **(1 x 1=1)**
3. इमां वार्तां निशम्य कः खिन्नमानसः अभवत्? **(1 x 1=1)**
4. गद्यांशे विद्यमानं क्त्वान्त-ल्यबन्त अव्ययानि चित्वा लिखत। **(1 x 2=2)**
5. कः एकाधिकं शतं ताडनं दण्डरूपेण अघोषयत्?
   (कुमारनाशान्, श्रीनारायणगुरुः, न्यायाधीशः) **(1 x 1=1)**
6. गद्यभागं पठित्वा उचितं शीर्षकं लिखत। **(1 x 1=1)**
7. गद्यांशस्य आशयं स्ववाक्यैः संगृह्य लिखत। **(1 x 6=6)**

## IV. उदाहरणानुसारं पदं विश्लेषयत। **(1 x 3=3)**

**उदा-** सह + एव- सहैव।

क. —— + एव = ममैव।

ख. विना + —— = विनैव।

ग. न + एव = -----।

## V. श्लोकं पठित्वा गद्यक्रमं पूरयत। **(1 x 4=4)**

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः।।

आत्मना एष ——— बलवान्—पित्रोः ——— समं———— ।

**VI. आशयानुसारं क्रमीकुरुत।** **(1 x 6 = 6)**

| | |
|---|---|
| एका जातिः एको धर्मः<br>एको देवः मनुष्याणाम्। | പല ധർമ്മസാരവും ഏകമാണ്. |
| मनुष्याणां मनुष्यत्वं<br>जातिर्गोत्वं गवां यथा। | അവനവനാത്മസുഖത്തിനാചരിക്കുന്നവ<br>അപരന് സുഖത്തിനായി വരേണം |
| बहुधर्मसारमेकमेव। | ഒരു ജാതി ഒരു മതം ഒരു ദൈവം മനുഷ്യന്. |
| स्वात्मसुखाय आचरितं कर्म<br>परेषां हिताय भवितव्यम्। | മനുഷ്യർക്ക് മനുഷ്യത്വവും,<br>മൃഗങ്ങൾക്ക് മൃഗത്വവുമാണ് ജാതി. |

**VII. प्रदत्तान् संभाषणांशान् पठित्वा उत्तरयत।**

सुप्रसिद्ध कूटियाट्टकलाकारः भवति पद्मश्री पी.के. नारायणन् नम्प्यार् महोदयः। तेन सह संस्कृतछात्रैः आयोजितस्य साक्षात्कारस्य प्रसक्तः भागः एव अधोदत्तः।

**साक्षात्कारं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि लिखत।**

प्रथमः छात्रः - महात्मन्, अभिवादयामहे वयम्, अपि कुशली? संस्कृतछात्राः स्मः।

आचार्यः - स्वस्त्यस्तु । को विशेषः?

द्वितीया छात्रा - जिज्ञासवो वयं कूटियाट्टमधिकृत्य।

आचार्यः - पृच्छन्तु यथेच्छम्।

तृतीयः छात्रः - सन्ति बह्वः कलाः भारतेषु। तथापि युनस्को इति अन्ताराष्ट्रसभायाः अङ्गीकारः प्रथमं कूटियाट्टस्य कृते एव लब्धः। तादृशं किं वैशिष्ट्यम् अस्ति अस्य?

आचार्यः - समीचीनम्। प्रतिभाति ममैवम्। यत् अस्याः कलायाः पौराणिकता, अधुनापि दृश्यमाना सजीवता, तथा अस्यां निहिता विज्ञानपरम्परा, सर्वोपरि संस्कृतस्य माहात्म्यं च।

प्रथमः छात्रः - भारतीयकालासु अस्यामेव संस्कृतमवशिष्यते किल?

आचार्यः - न न, कृष्णनाट्टमपि संस्कृतकलारूपमेव।

1. सुप्रसिद्धः कूटियाट्टकलाकारः कः? **(1x1=1)**
2. छात्राः किम् अधिकृत्य जिज्ञासवो भवन्ति? **(1x1=1)**
3. कूटियाट्टस्य माहात्म्यम् अधिकृत्य लघुटिप्पणीं लिखत । **(1x5=5)**

**अभिमुखस्य आवश्यकार्थं प्रश्नद्वयं रचयत।**

4. ..............................................? **(2x1=2)**
5. ...............................................?

**VIII. प्रदत्तसूचनामुपयुज्य श्रीनारायणगुरुदेवस्य जीवनचरितम् लिखत।** **(1x8=8)**

नाम - श्रीनारायणगुरुदेवः।
देशः - केरलम्।
जननं - १८५४ (1854) तिरुवनन्तपुरस्य समीपे चेम्पष़न्ती ग्रामे।
पितरौ - माडनाशान्, कुट्टियम्मा।
कर्मरंगम् - सन्यासी, नवोत्थाननायकः, संस्कृतपण्डितः।
प्रमुखकृतयः - आत्मोपदेशशतकम्, दर्शनमाला, दैवदशकम्।
समाधिः - १९२८ (1928) सितम्बर् मासे।

**IX. प्रादेशिकभाषया आङ्गलेयभाषया वा अनुवदत।** **(1x5=5)**

यशोधरे! अद्याहं लोकमपश्यम्। वार्धक्यं मरणं चापश्यम्। रोगं वेदनां चापश्यम्। साधारणम्, अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम्। बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सखीभिः सह विचरत्यवसरे।

**X. अधोदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत।** **(1x6=6)**

**क. पटकथां लिखत।**

'वत्से'! शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत्। "अम्ब प्रणामः"। "शारिके! जानामि सर्वं वृत्तान्तम्। सम्यगाचरितं भवत्या। तव स्नेहस्य, ममतायाः, आर्द्रतायाः च फलं नूनम् प्राप्स्यसि"। वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत्।।

**ख. पेटिकातः पदानि चित्वा वाक्यानि रचयत ।**

| | | |
|---|---|---|
| रोस्याः | महद्दुष्णं | सालारम् |
| पुत्रः | शब्दम् | उपविशति |
| प्रकोष्ठे | नाम | प्रतिध्वनति |
| वृद्धसदनस्य | कारयाने | वर्तते |

**XI. उदाहरणानुसारं परिवर्तयत।** **(2x2=4)**

**उदाहरणम्** - हरिकृष्णः गायति - हरिकृष्णः अगायत्।

क. सङ्गीता नृत्यति - ____________ ।

ख. प्रशान्तः क्रीडति - ____________ ।

**XII. प्रदत्तयोः प्रश्नयोः एकस्य उत्तरं लिखत।** **(6x1=6)**

**क) अधोदत्तं खण्डिकां पठित्वा आङ्गलेयपदानां स्थाने (In the place of English words) संस्कृपदानां उचितरूपाणि कोष्ठकात् चित्वा यात्राविवरणं पुनर्लिखत।**

अस्मिन् in the year वयं पठनयात्रार्थं केरलकलामण्डलं गन्तुम् आरब्धवन्तः। प्रातः 6 'O clock वयं बस् याने विद्यालयात् यात्राम् आरब्धवन्तः। in the morning बालसूर्यस्य सुवर्णकिरणानि दृष्ट्वा कोणार्क सूर्यक्षेत्रम् अस्माकं स्मृतिपथमागतम्। तस्मिन् समये रथ्यायां यानानाम् आधिक्यं न आसीत्। नव वादने वयं कलामण्डलं प्राविशाम। तत्र teacher कूटियाट्टं, रसाः, वाद्योपकरणानि च अधिकृत्य with example विशदयति स्म। एवं विज्ञानप्रदं च आसीत् अस्माकं study tour.

(प्रभाते, पठनयात्रा, वर्षे, षड्वादने, सोदाहरणम्, आचार्यः)

**ख) 'तव विरहे' इति पाठमाधारीकृत्य अष्टपद्याः आस्वादनटीकां सूचनानुसारं लिखत।**

**सूचनाः -**

- ☆ आवासो विपिनायते।
- ☆ हारं भारं मनुते।
- ☆ विषमिव पश्यति।

**XIII. यथोचितं योजयत।** **(5x1=5)**

1. तक्षकः - सूर्यक्षेत्रम्।
2. अशोकन् पुरनाट्टुकरा - सन्यासिवर्यः।
3. श्रीनारायणगुरुदेवः - कूटियाट्टम्।
4. कोणार्क् - जोसफ्।
5. पी.के.नारायणन् नम्प्यार् - महाप्रस्थानम्।

---

HSE II

## HALF YEARLY EXAMINATION 2017-18
## SANSKRIT - SECOND LANGUAGE
# ANSWER KEY

| | Qn. No. | Value Points | Split Score | Total |
|---|---|---|---|---|
| I. | 1 | गीतगोविन्दम्इति लेखनाय। | 1 | 5 (2) |
| | 2 | महाभारतं इति लेखनाय। | 1 | |
| | 3 | पि.सी. देवस्य इति लेखनाय। | 1 | |
| | 4 | श्रीबुद्धःइति लेखनाय। | 1 | |
| | 5 | कुमारनाशान्इति लेखनाय। | 1 | |
| | 6 | कूटियाट्टम्इति लेखनाय। | 1 | |
| | 7 | कोणार्कइति लेखनाय। | 1 | |
| II. | क) | श्लोक सूचनाय।<br>उचितरीत्या आस्वादन लेखनाय। | 2<br>4 | 6 |
| | ख) | उचितरीत्याटिप्पणीलेखनाय। | (6) | |
| III. | 1. | अरुविप्पुरजनपदस्य इति लेखनाय | 1 | 13 |
| | 2. | कदलीफलगुज्जंइति लेखनाय। | 1 | |
| | 3. | श्रीनारायणगुरुदेवःइति लेखनाय। | 1 | |
| | 4. | मूषित्वा/ज्ञात्वा, निशम्य इति लेखनाय | 2 | |
| | 5. | न्यायाधिपःइति लेखनाय | 1 | |
| | 6 | उचित शीर्षक लेकनाय। | 1 | |
| | 7. | उचितरीत्या संगृह्य लेखनाय | 6 | |
| IV. | क.<br>ख.<br>ग. | ममैवइति लेखनाय ।<br>विनैवइति लेखनाय।<br>नैवइति लेखनाय। | 1<br>1<br>1 | 3 |

| | | | | |
|---|---|---|---|---|
| V. | | बालकः, ज्ञानपूर्णः, आत्भुतानन्दशान्तिभिः, अवर्धतइति लेखनाय । | 1+1+1+1 | 4 |
| VI. | | आशयानुसारंक्रमीकरणाय । | 6 | 6 |
| VII | 1 | पी.के. नारायणन्नम्प्यार् | 1 | 9 |
| | 2 | कूटियाट्टमधिकृत्यइति लेखनाय | 1 | |
| | 3 | पौराणिकत, अजीवता, विज्ञानपराइत्यादिलेखनात्। | 5 | |
| | 4 | उचितं प्रश्नलेखनाय । | 1 | |
| | 5 | उचितं प्रश्नलेखनाय । | 1 | |
| VIII | | सूचनामनुसृत्य उचितरीत्याजीवचरित लेखनाय | 8 | 8 |
| IX. | | उचितरीत्या भाषानुवादाय | 5 | 5 |
| X. | क) | उचितरीत्या पटकथलेखनाय | 6 | 6 |
| | ख) | उचितरीत्यावाक्यरचनाय। | (6) | |
| XI. | क) | सङ्गीता अनृत्यत्इति लेखनाय । | 2 | 4 |
| | ख) | प्रशान्तः अक्रीडत्इति लेखनाय । | 2 | |
| XII. | क) | वर्षे, षट्वादने, प्रभाते, आचार्यः, सोदाहरणं, पठनाय । | 1+1+1+1+1+1 | 6 |
| | ख) | सूचनानुसारम् आस्वादनटीका लेखनाय। | (6) | |
| XIII.. | 1 | तक्षकः -जोसफ् । | 1 | 5 |
| | 2 | अशोकन् पुरनाट्टुकरा- महाप्रस्थानम्। | 1 | |
| | 3 | श्रीनारायणगुरुः- सन्यासिवर्यः। | 1 | |
| | 4 | कोणार्क - सूर्यक्षेत्रम्। | 1 | |
| | 5 | पी.के. नारायणन्नम्प्यार् - कूटियाट्टम्। | 1 | |
| आहत्य | | | | **80** |